# स्तोत्र मञ्जरी

## गणपतिस्तोत्रं

**नारद उवाच --**

**प्रणम्य शिरसा देवं गौरि पुत्रं विनायकम् !**

**भक्तावासं स्मरेत् नित्यं आयु: कामार्थ सिद्धये !!**

**प्रथमं वक्रतुण्डं तु एकदन्तं द्वितीयकम् !**

**तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् !!**

**लंबोदरं पञ्चमं च षष्ठं विकटमेव च !**

**सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्ठमम् !!**

**नवमं भालचन्द्रं च दशमं तु विनायकम् !**

**एकादशं गणपतिं द्वादशम् तु गजाननम् !!**

**द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः !**

**न च विघ्न भयं तस्य सर्वत्र विजयी भवेत् !!**

**विद्यार्थी लभते विद्यां धनार्थी लभते धनम् !**

**पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् !!**

**जपेत गणपतिस्तोत्रं षड्भिर्मासै: फलं भवेत् !**

**संवत्सरेण सिद्धिं च लभते नात्र संशयः !**

**अष्ठभ्यो ब्राह्मणेभ्यच लिखित्वा यः समर्पयेत् !**

**तस्य विद्या भवेत् सर्व गणेशस्य प्रसादतः !!**

इन्द्र उवाच –

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्र गदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ 1 ॥

नमस्ते गरुडारूढे डोलासुर भयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 2 ॥

सर्वज्ञे सर्ववरदे सर्व दुष्ट भयङ्करि ।
सर्वदुःख हरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 3 ॥

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मन्त्र मूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥ 4 ॥

आद्यन्त रहिते देवि आदिशक्ति महेश्वरि ।
योगज्ञे योग सम्भूते महालक्ष्मि नमोऽस्तु ते ॥ 5 ॥

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महा पाप हरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 6 ॥

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मि नमोऽस्तु ते ॥ 7 ॥

श्वेताम्बरधरे देवि नानालङ्कार भूषिते ।
जगस्थिते जगन्मातः महालक्ष्मि नमोऽस्तु ते ॥ 8 ॥

महालक्ष्मष्टकं स्तोत्रं यः पठेद् भक्तिमान् नरः ।
सर्व सिद्धि मवाप्नोति राज्यं प्राप्नोति सर्वदा ॥

**एककाले पठेन्नित्यं महापाप विनाशनम् ।**
**द्विकाल् यः पठेन्नित्यं धन धान्य समन्वितः ॥**

**त्रिकालं यः पठेन्नित्यं महाशत्रु विनाशनम् ।**
**महालक्ष्मी र्भवेन्-नित्यं प्रसन्ना वरदा शुभा ॥**

**[इन्त्यकृत श्री महालक्ष्म्यष्टक स्तोत्रं सम्पूर्णम्]**

सरस्वती स्तोत्रम्

श्वेतपद्मासना देवी श्वेतपुष्पोपशोभिता !

नित्या श्वेतगन्धानुलेपना !! 1

श्वेताक्षसूत्रहस्ता च श्वेतचन्दनचर्चिता !

श्वेतवीणाधरा शुभ्रा श्वेतालन्कारभूषिता !! 2

वन्दिता सर्वगन्धर्वैः अर्चिता सुरदानवैः !

पूजिता मुनिभिः सर्वैः सरस्वती स्तोत्रम्

श्वेतपद्मासना देवी श्वेतपुष्पोपशोभिता !

श्वेताम्बरधरा ऋषिभिः स्तूयते सदा !! 3

स्तोत्रेणानेन तां देवीं जगद्धात्रीं सरस्वतीम् !

ये स्मरन्ति त्रिसन्ध्यायां सर्वां विद्यां लभन्ते ते !! 4

श्री प्रह्लादेन कृतं हर्यष्टकम्

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः !

अनिच्छायापि संस्पृष्टो दहत्येव हि पावकः !! 1

स गङ्गा स गया सेतुः स काशी स च पुष्करम् !

जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् !! 2

वाराणस्यां कुरुक्षेत्रे नैमिशारण्य एव च !

यत्कृतं तेन येनोक्तं हरिरित्यक्षरद्वयम् !! 3

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च !

तानि सर्वाण्यशेषाणि हरिरित्यक्षरद्वयम् !! 4

गवां कोटि सहस्राणि हेमकन्यासहस्रकम् !

दत्तं स्यात् तेन येनोक्तं हरिरित्यक्षरद्वयम् !! 5

ऋग्वेदोथ यजुर्वेदः सामवेदोप्यथर्वणः !

अधीतस्तेन येनोक्तं हरिरित्यक्षरद्वयम् !! 6

अश्वमेधैर्महायज्ञैः नरमेधैस्तथैव च !

इष्टं स्यात् तेन येनोक्तं हरिरित्यक्षरद्वयम् !! 7

प्राण प्रयाण पाथेयं संसार व्याधिनाशनम् !

दुःखात्यन्त परित्राणं हरिरित्यक्षरद्वयम् !! 8

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति !

सकृत् उच्चारितं येन हरिरित्यक्षरद्वयम् !! 9

हर्यष्टकमिदं पुण्यं प्रारुत्थाय यः पठेत् !

आयुष्यं बलमारोग्यं यशोवृद्धिः श्रियावहम् !! 10

प्रह्लादेन कृतं स्तोत्रं दुःखसागर शोषणम् !

यः पठेत् स नरो याति तत् विष्णोः परमं पदम् !! 11

!! इति हर्यष्टकं समाप्ता !!

श्री वादिराजयति कृत हयग्रीव स्तोत्रं

हयग्रीव हयग्रीव हयग्रीवेति वादिनम् !

नरं मुञ्चन्ति पापानि दरिद्रमिव योषितः !! 1

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत् !

तस्य निस्सरते वाणी जन्हुकन्याप्रवाहवत् !! 2

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः !

विशोभते च वैकुण्ठ कवाटोद्घाटन क्षमः !! 3

श्लोकत्रयमिदं पुण्यं हयग्रीव पदान्कितम् !

वादिराजयतिप्रोक्तं पठतां संपदां पदम् !! 4

!! इति श्रीहयग्रीव स्तोत्रं संपूर्णम्!!

**!! श्रीमन्महाभारते श्री कृष्ण द्वादश नाम स्तोत्रम् !!**

**श्री कृष्ण उवाच --**

**किं ते नामसहस्रेण विज्ञातेन तवार्जुन !**

**तानि नामानि विज्ञाय नरः पापैः प्रमुच्यते !! 1**

**प्रथमं तु हरिं विद्यात् द्वितीयम् केशवं तथा !**

**तृतीयं पद्मनाभं च चतुर्थं वामनं स्मरेत् !! 2**

**पञ्चमं वेदगर्भं च षष्ठं च मधुसूदनम् !**

**सप्तमं वासुदेवं च वराहं चाष्टमं तथा !! 3**

**नवमं पुण्डरीकाक्षं दशमं हि जनार्दनम् !**

**कृष्णमेकादशं विद्यात् द्वादशम् श्रीधरं तथा !! 4**

**द्वादशैतानि नामानि विष्णुप्रोक्तान्यनेकशः !**

**सायं प्रातः पठेन्नित्यं तस्य पुण्यफलं श्रुणु !! 5**

चान्द्रायणसहस्राणि कन्यादानशतानि च !

अश्वमेधसहस्राणि फलं प्राप्नोत्यसंशयः !! 6

अमायां पौर्णमास्यां च द्वादश्याम् तु विशेषतः !

प्रातः काले पठेन्नित्यं सर्व पापैः प्रमुच्यते !! 7

!! इति श्री कृष्ण द्वादश नाम स्तोत्रं संपूर्णम् !!

!! अष्टाक्षरी स्तुतिः !!

ॐ नमः प्रणवार्थाथ स्थूल सूक्ष्म क्षराक्षर !

व्यक्ताव्यक्त कळातीत ओंकाराय नमो नमः !! 1

नमो देवादिदेवाय देहसञ्चार हेतवे !

दैत्यसङ्घ विनाशाय नकाराय नमो नमः !! 2

मोहनं विश्वरूपं च शिष्टाचार सुपोषितं !

मोह विध्वंसकं वन्दे मोकाराय नमो नमः !! 3

नारायणाय नव्याय नरसिंहाय नामिने !

नादाय नादिने तुभ्यं नाकाराय नमो नमः !! 4

**रामचन्द्रं रघुपतिं पित्राज्ञ्य परिपालकं !**

**कौसल्यातनयं वन्दे राकाराय नमो नमः !! 5**

**यज्ञाय यज्ञगम्याय यज्ञरक्षकराय च !**

**यज्ञाङ्ग रूपिणे तुभ्यं यकाराय नमो नमः !! 6**

**णाकारं लोकविख्यातं नानाजन्म फलप्रदं !**

**नानाभीष्टप्रदं वन्दे णाकाराय नमो नमः !! 7**

**यज्ञकर्त्रे यज्ञभर्त्रे यज्ञरूपाय ते नमः !**

**सुज्ञान गोचरायास्तु यकाराय नमो नमः !! 8**

**औंकारमन्त्र संयुक्तं नित्यं ध्यायन्ति योगिनः !**

**कामदं मोक्षदं तस्मै औंकाराय नमो नमः !! 9**

**नारायणः परं ब्रह्म नारायणः परं तपः !**

**नारायणः परो देवः सर्वं नारायणस्सदा !! 10**

**!! इति अष्टाक्षरी स्तुतिः संपूर्णा !!**

!! श्री लक्ष्मीद्वादशनाम स्तोत्रम् !!

श्री देवी प्रथमं नाम द्वितीयं अमृतोद्भवा !

तृतीयं कमला प्रोक्ता चतुर्थं लोकसुन्दरी !! 1

पञ्चमं विष्णुपत्नी च षष्ठं स्यात् वैष्णवी तथा !

सप्तमं तु वरारोहा अष्टमं हरिवल्लभा !! 2

नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका !

एकादशं तु लक्ष्मीः स्यात् द्वादशम् श्रीहरिप्रिया !! 3

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः !

आयुरारोगयमैश्वर्यम् तस्य पुण्यफलप्रदम् !! 4

द्विमासं सर्वकार्याणि षण्मासात् राज्यमेव च !

संवत्सरं तु पूजायाः श्रीलक्ष्म्याः पूज्य एव च !! 5

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं

दासिभूत समस्त देववनितां लोकैक दीपांकुराम् !

श्रीमन्मन्दकटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां

त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् !! 6

!! इति श्रीलक्ष्मी द्वादशनाम स्तोत्रं संपूर्णम् !!

!! श्री विष्णोः षोडशनाम स्तोत्रम् !!

औषधे चिन्तयेत् विष्णुं भोजने च जनार्दनम् !

शयने पद्मनाभं च विवाहे च प्रजापतिम् !! 1

युद्धे चक्रधरं देवं प्रवासे च त्रिविक्रमम् !

नारायणं तनुत्यागे श्रीधरं प्रियसङ्गमे !! 2

दुःस्वप्ने स्मर गोविन्दं सङ्कटे मधुसूदनम् !

कानने नारसिंहं च पावके जलशायिनम् !! 3

जलमध्ये वराहं च पर्वते रघुनन्दनम् !

गमने वामनं चैव सर्वकालेषु माधवम् !! 4

षोडशैतानि नामानि प्रातरुत्थाय यः पठेत् !

सर्वपापविनिर्मुक्तो विष्णुलोके महीयते !! 5

!! इति श्री विष्णोः षोडशनामस्तोत्रं संपूर्णम् !! !!

श्री कृष्णाष्टकम् !!

वसुदेव सुतं देवं कंस चाणूरमर्दनम् !

देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् !! 1

असतिपुष्पसङ्कासं हारनूपुर शोभितम् !

रत्नकङ्कण केयूरं कृष्णं वन्दे जगद्गुरुम् !! 2

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम् !

विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् !! 3

मन्धारगन्धसंयुक्तं चारुहासं चतुर्भुजम् !

बर्हिपुच्छाव चूदाङ्गं कृष्णं वन्दे जगद्गुरुम् !! 4

उत्फुल्ल पद्म पत्राक्षं नीलजीमूतसन्निभम् !

यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् !! 5

रुक्मिणी केळिसंयुक्तं पीतांबर सुशोभितम् !

अवाप्त तुलसिगन्धं कृष्णं वन्दे जगद्गुरुम् !! 6

गोपिकानां कुचद्वन्द कुङ्कुमाङ्कित वक्षसम् !

श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् !! 7

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम् !

शङ्ख चक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् !! 8

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् !

कोटिजन्म कृतं पापं स्मरणेन विनश्यति !! 9

!! इति कृष्णाष्टकम् संपूर्णम् !!  सप्ताश्व रथमारूढं प्रचण्डं कश्यपात्मजम् !

श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् !! (RATHA SAPTHAMI)

भीमसेन समो नास्ति सेनयोरुभयोरपि !

पाण्डित्वे च पटुत्वे च शुरत्वे च बलेपि च !! (BHEESHMAASHTAMI)

गुणैकसिन्धुं गुरुपुङ्गवं तं सदैकबन्धुं सकलाकलापम् !

मनोजबन्धुं नतपादपद्मं नमाम्यहं मध्वमुनिं वरेण्यम् !! (MADWA NAVAMI)

!! श्री मधुसूदन स्तोत्रम् !!

ॐ इति ज्ञानमात्रेश रोगाजीर्णेन निर्जितः !

कालनिद्रां प्रपन्नोस्मि त्राहि मां मधुसूदन !! 1

न गतिर्विद्यते चान्या त्वमेव शरणं मम !

पापपङ्के निमग्नोस्मि त्राहि मां मधुसूदन !! 2

मोहितो मोह जालेन पुत्र दार गृहादिषु !

तृष्णया पीड्यमानोस्मि त्राहि मां मधुसूदन !! 3

भक्तिहीनं च दीनं च दुःखशोकातुरं प्रभो !

अनाश्रयनाथं च त्राहि मां मधुसूदन !! 4

गतागतेन श्रान्तोस्मि दीर्घसंसारवर्त्मसु !

येन भूयो न गच्छामि त्राहि मां मधुसूदन !! 5

बहवो हि मया दृष्टा क्लेशाश्चैव पृथक् पृथक् !

गर्भवासे महत दुःखं त्राहि मां मधुसूदन !! 6

तेन देव प्रपन्नोस्मि त्राणार्थं तवत्परायणः !

दुःखार्णव परित्राणात् त्राहि मां मधुसूदन !! 7

वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम् !

तत्पापार्जित मग्नोस्मि त्राहि मां मधुसूदन !! 8

सुकृतं न कृतं किञ्चित् दुष्कृतं च कृतं मया !

घोरे भवे निमग्नोस्मि त्राहि मां मधुसूदन !! 9

देहान्तर सहस्रेषु चान्योन्यं भ्रामितो ह्यहम !

तिर्यक्त्वं च मानुषत्वं च त्राहि मां मधुसूदन !! 10

वाचयामि यथोन्मत्तः प्रलपामि तवाग्रतः !

जरामरण भीतोस्मि त्राहि मां मधुसूदन !! 11

यत्र यत्र च यातोस्मि स्त्रीषु वा पुरुषेषु वा !

तत्र तत्राचला भक्तिः त्राहि मां मधुसूदन !! 12

गत्वा गत्वा निवर्तन्ते चन्द्र सूर्यादयो ग्रहाः !

कदापि न निवर्तन्ते द्वादशाक्षर चिन्तकाः !! 13

ऊर्ध्वं पाताल मर्त्येषु व्याप्त लोक जगत्त्रयम् !

द्वादशाक्षरात्परं नास्ति वासुदेवेन भाषितम् !! 14

द्वादशाक्षर महामन्त्रं सर्व काम फलप्रदम् !

गर्भवासनिवासेन शुकेन परिभाषितम् !! 15

द्वादशाक्षर निराहारो यः पठेत् हरिवासरे !

स गच्छेत् वैष्णवं स्थानं यत्र योगेश्वरो हरिः !! 16

!! इति श्री मधुसूदन स्तोत्रं संपूर्णम् !!

!! सुभाषितानि !!

क्षणशः कणश्चैव विद्यां अर्थं च साधयेत् !

क्षणे नष्टे कुतो विद्या क्षणे नष्टे कुतो धनम् !!

MEANING: ONE SHOULD KEEP LEARNING EVERY MOMENT. IF YOU WASTE A SECOND,
YOU WOULD MISS SOME KNOWLEDGE. SIMILARLY, IF YOU MISS A COIN, YOU WOULD MISS A GREAT FORTUNE. THEREFORE, EVERY MOMENT IS IMPORTANT,

AS EVERY COIN IS IMPORTANT.

MORAL; SHRI MADHWACHARYA CAUTIONS:

WE SHOULD NEVER STAY A SINGLE SECOND AWAY FROM HARI NAMA SMARANE. HE SAYS, A MOMENT WHICH IS DEPRIVED OF GOD IS A BAD MOMENT FOR THE SAADHAKAA.

!! श्री नवग्रह स्तोत्रम् !!

भास्वान् मे भासयेत् तत्त्वं चन्द्रश्चाह्लादकृत्भवेत् !

मङ्गलो मङ्गलं दद्यात् बुधश्च बुधतां दिशेत् !! 1

गुरुर्मे गुरुतां दद्यात् कविश्च कवितां दिशेत् !

शनिश्च शं प्रापयतु केतुः कीर्तिजयः अर्पयेत् !! 2

राहुर्मे रहयेत् रोहं ग्रहाः सन्तु करग्रहाः !

नवं नवं ममैश्वर्यं दिशन्त्वेते नवग्रहाः !! 3

शने दिनमणेः सूनोः ह्यनेकगुणजन्मने !

अरिष्टं हर मे अभीष्टं कुरु मा कुरु संकटम् !! 4

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च !

वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत् !! 5!!

श्री गणेश पञ्चरत्नम् !!

मुदा करात्तमोदकं सदा विमुक्तिसाधकं

कलाधरावतंसकं विलासिलोकरक्षकम् !

अनायकैकनायकं विनाशितेभदैत्यकं

नताशुभाशुनाशकं नमामि तं विनायकम् !! 1

नतेतरातिभीकरं नवोदितार्कभास्वरं

नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् !

सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं

महेश्वरं तमाश्रये परात्परं निरन्तरम् !! 2

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं

दरेतरोदरं वरं वरेभवक्त्रमक्षरम् !

कृपाकरं क्षमाकरं मुदाकरं यशस्करं

मनस्करं नमस्कृतां नमस्करोमि भास्वरम् !! 3

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं

पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् !

प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं

कपोलदानवारणं भजे पुराणवारणम् !! 4

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं

अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् !

हृदन्तरे निरन्तरं वसन्तमेव योगिनां

तमेकदन्तमेकमेव चिन्तयामि सन्ततम् !! 5

महागणेश पञ्चरत्नमादरेण योऽन्वहं

प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् !

अरोगतां अदोषतां सुसाहितीं सुपुत्रतां

समाहितायुरष्टभूतिमभ्युपैति सः अचिरात् !! 6